स्थितस्य च मम द्वारि स कालो व्यत्यवर्तत ॥ १५
अहं तु नष्टं तं ज्ञात्वा स्नेहादागतसंभ्रमः ।
भ्रातरं न हि पश्यामि पापशङ्कि च मे मनः ॥ १६
अथ दीर्घस्य कालस्य बिलात्तस्माद्विनिःसृतम् ।
सफेनं रुधिरं रक्तमहं दृष्ट्वा सुदुःखितः ॥ १७
नर्दतामसुराणां च ध्वनिर्मे श्रोत्रमागतः ।
निरस्तस्य च संग्रामे क्रोशतो निःस्वनो गुरोः ॥ १८
अहं त्ववगतो बुद्ध्या चिह्नैस्तैर्भ्रातरं हतम् ।
पिधाय च बिलद्वारं शिलया गिरिमात्रया ।
शोकार्तश्चोदकं कृत्वा किष्किन्धामागतः सखे ॥ १९

177* प्रतिसिद्धस्तदानीं स सम्प्रविष्टश्च तद्बिलम् ।
[V3 B4 तदा वाली (for तदानीं स)],

While D3 ins

178* मद्वरेण हनिष्यामि बिलस्थमसुरं प्रभो ।

—D11 om from 14ᶜ up to 15ᵇ —V3 illeg for 14ᶜᵈ —ᶜ) V1 स्थापयित्वा (for स्थाप°) D3 8–10 सः D6 T3 G1 3 Cm तु (for च) Ś1 D1–4 12 13 मा(Ś1 D2 13 मा)परित्यज्य तु मा(D13 मा) प्राणै (D3 पद्भ्याम्) Ñ1 विवृत पाणिना सत्ये, Ñ2 V2 B D7 M1 स्थाप(M1 स्थाप्य)यित्वा तु मां पद्भ्यां —ᵈ) Ñ2 V1 2 B D7 T1 2 G2 M3 सहत्, D2 5 6 8–10 T3 G1 3 M3 तत (for सदा)

15 D11 om 15ᵃᵇ (cf v l 14) —ᵃ) Ñ1 D2 12 बिले (for बिल) —Ś1 om (hapl ?) 15ᶜ–17 —ᶜ) Ñ1 V1 च मह्द्, D1 13 मम च (by transp) D3 8–10 च बिल (for च मम) M1 द्वारे (for द्वारि) G2 स्थितस्य मम च द्वारे, G3 स्थितस्य मे बिलद्वारे —ᵈ) V3 व्यत्यवर्तत, G1 Cl [s]प्यत्यवर्तत M1 2 व्यत्य°; Ct as in text (for व्यत्यवर्तत) D1 11 रक्षमाणस्य गच्छत —After 15 B4 ins

179* न चैव निसृतो वाली ततस्तत्कम्पितो ह्यहम् ।

while D1 2,4,12 13 ins whereas L (ed) ins after 16ᵃᵈ

180* न निष्क्रामति वालीति ततोऽहं भृशदुःखितः ।
[D13 निष्क्रामति (for नि°)]

16 Ś1 om 16 (cf v l 15) D13 om 16–17 Ñ1 D2 4 12 om 16ᵃᵇ V3 illeg for 16 D1 reads 16ᵃᵇ in marg —ᵃ) T1 2 M1 2 ज्ञात्वा तं (by transp) Ñ2 V1 भनि ष्टं (Ñ2 ° ष्टं) तं तु तं ज्ञात्वा V2 B D3 भनिष्पतंतं (D7 °तु) तं ज्ञात्वा D3 भनि सरसे तं ज्ञात्वा D11 भनिर्गच्छंतं तं ज्ञात्वा —After 16ᵃᵇ, L (ed) ins 180* —D1 reads 16ᶜ–17 in marg —ᶜ) D3 8–10 T2 G1 3 M3 न प्र ; D6 तं मा T1 2 तु न, G1 न स्मा M1 न च (for न हि) Ñ1 कातरो बुद्धभावेन D1 2,4 12 कातरो बुद्धिभावेन —ᵈ) D6 पापशंकितः Cv m g k पापशंकि च Ct as in text (for पापशङ्कि च) D6 शंकिते मे मनोऽभवत् —For 16ᶜᵈ, Ñ2 V1 2 B D7 subst

181* भ्रातरं दुष्टवान्पाप पापशङ्काभवत्तदा ।

[V3 पापशंकी, B4 D7 पापशंकी (for °क्ष) V1 B3 पापशङ्कितमनास्तदा (B3 °मन [sic]) (for the post half)]
while D3 11 subst

182* उद्विग्नमानसो जातस्तस्य भ्रातुरनिर्गमात् ।

17 Ś1 D13 om D1 reads in marg 17 (cf v l 15 and 16) —ᵇ) Ñ1 D1 2 12 13 बिलद्वाराद् V1 D7 बिलात्तस्य (for बिलात्तस्माद्) D3 (also as in text) M3 विनिर्गतं (for विनि सृतम्) In M3, lacuna from तं up to न in ° is filled up sec m —ᶜ) Ñ1 D1–3 11 12 सीर्यं, Ñ2 D7 यथयात् V B3 4 स्यात्, B1 2 (also भूरि) यवत्र, D3 8–10 दृष्ट्वा, Cv r m g as in text (for रक्तम्) —ᵈ) D11 [अ]ति (for सु) Ñ1 D1 2 12 दृष्ट्वाहं भृशदुःखितः ; Ñ2 V B D7 तं (Ñ2 B3 तद्) दृष्ट्वा व्यथितो (V2 B4 दु खितो) ऽभवं; D3 8–10 ततोऽहं भृशदुःखितः

18 ᵃ) Ś1 D11 नदताम् —ᵇ) B4 आश्रुत (for आगत) —D11 om 18ᶜᵈ —ᶜ) Ś1 D4 13 निष्प(Ś1 °ष)तस्य, B D7 स्य°, D8,10 Ct न रतस्य (for निरस्तस्य) —ᵈ) D8,9 10 T1 M3 Ct [s]पि स्वनो; D6 नि स्वनो T3 [s]पि स्वनं, G1 मे स्वरो (for नि स्वनो) Ś1 D1–4 12,13 महान् (for गुरो) Ñ2 V B D7 क्रोशतो नि स्वनो महान् —For 18ᶜᵈ, N1 subst

183* तेषां निवसतां तत्र घोषं मे नि स्वनो महान् ।

19 ᵃ) V1 2 B4 [अ]पगतो (for [अ]व°) D6 तु (for बुद्ध्या) Ś1 B1–3 D2 13 अहं त्वव(Ś1 D13 °वा)गतो बुद्ध्वा —ᵇ) Ś1 D13 च; Ñ1 D1 2 12 G2 तैः D6 स्तैः (for तैर्) —For 19ᵃᵇ, D3 11 subst

184* भ्रातरं निहतं चाहं तेन शब्देन शङ्कितः ।

—Thereafter both cont.

185* ततो मया भयात्तस्य दानवस्य दुरात्मनः ।

—Ś1 Ñ1 D2,4 12,13 om 19ᶜᵈ D1 reads 19ᶜᵈ in marg —For 19ᶜᵈ, Ñ2 V B D7 subst

186* पूरयित्वा शिलाभिस्तु बिलं शोकसमन्वित ।
[B4 तु (for तु) V3 वारि (for बि°)],

while D3 11 subst

187* सहन्या शिलया पूर्वं बिलस्य पिहितं मुखम् ।

—Thereafter both cont

गूहमानस्य मे तत्त्वं यत्नतो मन्त्रिभिः श्रुतम् ।
ततोऽहं तैः समागम्य समेतैरभिषेचितः ॥ २०
राज्यं प्रशासतस्तस्य न्यायतो मम राघव ।
आजगाम रिपुं हत्वा वाली तमसुरोत्तमम् ॥ २१
अभिषिक्तं तु मां दृष्ट्वा क्रोधात्संरक्तलोचनः ।
मदीयान्मन्त्रिणो बद्ध्वा परुषं वाक्यमब्रवीत् ॥ २२
निग्रहेऽपि समर्थस्य तं पापं प्रति राघव ।
न प्रावर्तत मे बुद्धिर्भ्रातृगौरवयन्त्रिता ॥ २३
मानयंस्तं महात्मानं यथावच्चाभ्यवादयम् ।
उक्ताश्च नाशिषस्तेन संतुष्टेनान्तरात्मना ॥ २४

G 4 8 57
D. 4. 9. 25
L. 4 7 44

इति श्रीरामायणे किष्किन्धाकाण्डे नवमः सर्गः ॥ ९

188* ततोऽहं वज्रमास्थाय छिद्रित्वा भ्रातरं हतम् ।

—D4 transp. 19^{c}-20^{b} and 20^{c}-21^{b} —^{c}) Ś1 Ñ1 D1.12 दुःखार्तेन (for शोका°) D1 दृष्ट्वा, G2 कर्तुं (for हत्वा) D1.2.12 दुःखार्तश्चोद्के दृष्ट्वा. —^{d}) Ś1 Ñ1 D2.4.12.13 तत, D1 सदा (for सले) D2.11 किष्किंधा पुनरागत

20 D4 transp 19^{c}-20^{b} and 20^{c}-21^{b}. —^{a}) G1 गाहमानस्य Ñ1 मा (for मे) Ñ1 यत्न, Ñ2 B D2.11 तत्तु, D2 तु तु (for तत्त्व) Ś1 D1.4.12 गूहमानं च(D1.4 तु) मा (Ś1 मे) यत्नात्, D2.13 गूहमान तु त(D13 मा) ज्ञात्वा —^{b}) D2 यततो (for यत्नतो) V2 सह, G3 हुत (for श्रुतम्) Ś1 Ñ1 D1.2.4.12.13 त(D12.13 तद्) वै(Ś1 D12 च) भ्रातृ विपर्यय —^{c}) Ñ2 V B D2.7.11 G3 मन्त्रिभि सर्वै (for तै समागम्य) Ś1 Ñ1 D1.2.4.12.13 श्रुत तैर(D2 वै)मन्त्रिभि (D13 मुनिभि) सर्वै (Ñ1 सर्वम्) —^{d}) Ś1 D2.4.12.13 ततोहम्, Ñ2 V B D2 राज्येऽस्मिन्, G1 समस्तैर् (for समेतैर्) Ñ1 सह राज्येऽभिषेचित, D2 तथा श्रुत्वाभिषेचित D2.11 समेत्य नृपति कृत

21 G1 om 21^{ab}. D4 transp 19^{c}-20^{b} and 20^{c}-21^{b}. —^{a}) T2 तत्र (for तस्य) Ś1 Ñ1 D1.2.4.12.13 राज्य प्रशास(Ś1 °स)माने तु D2.11 राज्य प्रशासमानस्य —^{b}) Ś1 Ñ1 D1.2.4.12.13 मयि (for मम) —For 21^{ab}, Ñ2 V B D7 subst

189* मयि शासति राज्यं तु धर्मेण रघुनन्दन ।

—^{c}) V2 बिल (sic) (for रिपुं) —^{d}) G1 om for वाली स Ñ2 V B D7 तं घोरं (G[ed] घोर त) सोध (Ñ1 D7 स हि) वानर, D2.5.6.8-11 दानव (D2.11 किष्किंधा) स तु वानर; T1 वानर स तु दानव ※ Ct मम समीप मागच्छम् स वानर इत्यन्वय. ※

22 ^{a}) D2 च, G1 M2 (after corr sup lin sc. m. as in text) स (for तु) D1 तं (sic) (for मां) —^{b}) Ś1 V2.3 B D1-4.7.9.11-12 रोष, Ñ1 M1 वाली (for क्रोधात्) —^{c}) V1 B1-3 D2.6 बद्ध्वा (for बद्ध्वा) —^{d}) Ś1 D1.4.12.13 उक्तवान् (for अब्रवीत्)

23 In M2 lacuna from प्र up to त is filled up sec m —^{a}) Ñ1 निग्रहेऽ, V3 विनिग्रहे; D1.2 M2 विग्रहे च (D1 °पि), D5-10 T2 G2 निग्रहे च (for निग्रहेऽपि) V2 [स]समर्थस्य D2.11 निग्रहे च समर्थोऽहि(D2 °र्थो हि) Ñ2 V B1-3 D2.7.11 तस्य पापस्य राघव; B4 पापस्य तस्य राघव —^{c}) Ñ2 V B D7 प्रावर्तत न (by transp) M1 न मे प्रवर्तते बुद्धिर् —^{d}) Ñ2 V B D7 तदा, D2 M2 भ्रातुर् (for भ्रातृ) G2 damaged from र up to ता Ś1 Ñ1 D1.2.4.12.13 हेतुं भ्रातरमग्रजं —After 23, D5.8-10 T G (G2 illeg) M1.2 ins.

190* हत्वा शत्रुं स मे भ्राता प्रविवेश पुरं तदा ।

[G2 पुरी (for पुर)]

24 ^{a}) G2 damaged (for मानयंस्त) D2.12 तु (for तं) Ś1 D1.13 मानयंस्त्वहमात्मानं, Ñ1 मानयंस्त्वहमेवेन (sic), Ñ2 V B D7 असान्त्वयमहं तं च, D2.11 मानयन्नै (D11 °येश) गुरुत्वे(D12 °ज्ये)ष्ठ D1 मानयन्भ्रातरमहं —^{b}) D1 तु (for च) Ñ2 V B D7 अभि(B2-4 °ति) नद्यन्, D2-4.11.12 अभिवादयन्(D2.11 °ये), D12 मानयन् (for चाभ्यवादयम्) D2 सत्कृत्य मामुपस्थिते —^{c}) D5.8-10 T1 प्रहृष्टेन (for संतु°). —For 24^{cd}, Ś1 Ñ V B D1-4.7.11-13 subst

191* उचिताश्चाशिषो दत्त्वा प्रहृष्टेनान्तरात्मना ।

[Ñ2 V2 B D7 तस्य (for दत्त्वा) V2.3 क्रियास्तस्य (for [आ]शिषो दत्त्वा) D1 उच्छ्रयन्त्वाशिषादाने, D2.4.13 नैनिशा आशिषोऽन्ये; D2.12 न त्वथ(D13 नैनिनाथा)शिषो मम (for the prior half) Ñ2 V B D7 प्रयुक्तो यथाविधि, D2.11 नैवाय क्रोधमूर्छित (for the post half).]

—Thereafter Ś1 D2.4.12 cont D2.13 ins. before 4 10.1, while D4 subst for 4 10 1

192* कुपयित्वा तु तं क्रुद्धमिदैवमयोपिते ।
न मां गीतापिरश्रुत्य नाशनाद्दं मयास्य हि ।

१०

G 4 9 1
B 4 10 1
L 4 7 46

ततः क्रोधसमाविष्टं संरब्धं तमुपागतम् ।
अहं प्रसादयांचक्रे भ्रातरं प्रियकाम्यया ॥ १
दिष्ट्यासि कुशली प्राप्तो निहतश्च त्वया रिपुः ।
अनाथस्य हि मे नाथस्त्वमेकोऽनाथनन्दनः ॥ २
इदं बहुशलाकं ते पूर्णचन्द्रमिवोदितम् ।
छत्रं सवालव्यजनं प्रतीच्छस्व मयोद्यतम् ॥ ३
त्वमेव राजा मानार्हः सदा चाहं यथा पुरा ।
न्यासभूतमिदं राज्यं तव निर्यातयाम्यहम् ॥ ४

[D1 3 12 च (D13 तु) सकृत्रम् Ś1 D4 12 रमयामि ह्रसंकुलम् (for the prior half) Ś1 D13 अनयोचित D13 अयथो चितं —Ś1 D12 om l 2 —(l 2) D1 3 मे (for मां) D4 लिह (for [अ]स्य हि)]

—Then D3 further cont while D11 cont after 191*

193* स तु विशुभ्रमुत मतापवा
 नुदितदिवाकरतुल्यदर्शन ।
 रुपित इव स दीप्तिमानम्
 न्भयि विनिवेदितदुष्टवाक्यति ।
 [(l 1) D3 lacuna up to त]

—After 191* Ñ2 V B D7 cont

194* एवंविधन मानेन मानयामि स्म वालिनम् ।
 म च मे प्रतिजग्राह कलुषेणान्तरात्मना ।
[(l 1) B1-3 मानयामास —(l 2) Ñ2 V2 D7 तद् (for त) B2.3 कल्मषेण (for कलुषेण)]

—After 24 D4 8 10 T1 3 G M ins

195* नत्वा पादावह् तस्य मुकुटेनास्पृशं प्रभो ।
 अपि वाली मम क्रोधान्न प्रसादं चकार स ।
[(l 1) T1 गत्वा (for नत्वा) D6 पादतल (for पादावहं) —(l 2) D6 जगाम (for चकार) G1 ह (for स) M3 न प्रसन्नश्च राघव (for the post half)]

Colophon Ś1 D1 3 12 om (Sarga cont) G2 mostly damaged —*Sarga name* Ñ1 D2.3 11 12 वालिचरित Ñ2 सुग्रीववाक्य V B वैर(B1 °रि)निर्वेदन —*Sarga no* (figures words or both) N1 V1 B1 D1 om Ñ2 V2 3 B2.3 D5 6 10 T G1 3 M 9 B4 8 D11 10 6 —After colophon G1 3 conclude with श्रीरामाय नम

10

Ś1 D1 3 12 continue the previous Sarga M1 begins with श्रीरामाय नम Before 1 D4 12 ins 192*

1 G2 damaged from 1 up to l 3 of 196* —a) Ś1 D1 3.12 तं तु (for ततः) D5 -समायुक्तं Ñ2 V B D7 ततस्तं क्रोधसरब्धं D13 न तुरुचोरुवसहिए (corrupt) —b) Ś1 D2.12 12 समुप(D12 °पा)स्थितं Ñ1 मामुपागतं V1 समुपागतो D1 मामुपस्थितं D3 12 वालिनं वरा (for तमुपागतम्) Ñ1 V2.3 B D7 सरभासमुपागतं —c) N2 V2.3 B D7 स(D7 त)प्रसादयमव्यग्रो(N2 V3 D7 °ग्रं) —d) V2 भ्रातरि (for भ्रातरं) Ś1 D6 10 12 T1 3 Ch t हितकाम्यया —For 1 D4 subst 192*

2 G2 damaged for 2 (cf v l 1) —a) Ñ1 D7 T1 च B1 3(*sup lin* also as in text) 1 [अ]पि D1 स D13 तु (for [अ]सि) D2 12 भ्राता (for प्राप्तो) —b) Ś1 N V B D1—3 7 12 13 G2 दिष्ट्या च(Ñ1 वि) निहतो रिपु —c) D6.12 च (for हि) —d) D1 12 om from त्वम up to न in d Ś1 D4 8 12.13 नाथ(D12 3 4) वत्सर, N1 °वत्सदा Ñ2 V B D1 कपियूथप, D6 12 बंधुनंदन L(ed) वत्सदत्सर Cv r m g as in text (for अनाथनन्दन)

3 G2 damaged for 3 (cf v l 1) —a) D2.11 शतशलाकं (for बहु°) D1 3 12 मे D2 त्वं (for ते) —b) Ś1 N1 D1 3.12 13 पूर्णचंद्रसमप्रभं Ñ2 V B D7 पूर्णचंद्रनिभं शुभं —c) Ś1 Ñ V B D1 3 7 12 प्रतीच्छ त्वं Ś1 N1 D2 12 मयोद्धृतं Ñ2 V B1 3 मयोद्धृ(B1—3 °द्वि)तं D4.8—10 मया धृतं (for मयोद्यतम्) —After 3 D4.6 8—10 S ins

196* भ्रातस्तत्र बिलद्वारि स्थित संवत्सरं नृप ।
 दृष्ट्वा च शोणितं द्वारि बिलाच्चापि समुत्थितम् ।
 शोकसंविग्नहृदयो भृशं व्याकुलितेन्द्रिय ।
 अपिधाय बिलद्वारं शैलशृङ्गेण तत्तदा ।
 तस्माद्देशादपाक्रम्य किष्किन्धां प्राविशं पुन । [5]
 विषादास्त्विह मां दृष्ट्वा पौरैर्मन्त्रिभिरेव च ।
 अभिषिक्तो न कामेन तन्मे त्वं क्षन्तुमर्हसि ।
[G2 damaged up to l 3 (cf v l 1) —(l 1) D6 T2 G1 चापो T1 3 M1 3 Cg चाप M2 चापो B(ed) भव (for तत्र) G2 निवृत्तश्च (for भ्रातस्तत्र) M3 संवत्सरात् (for °रं) G2 रया (for नृप) —(l 2) G1 तु M3 Cg [अ]थ (for first च) D6 द्वारे (for द्वारि) D6 वा (for second च) —(l 3) G1 -संतप्त- M3 संविग्न Cg as above (for संविग्न) —(l 4) T2 तथिधाय M1 भ्रापि° (for अपिधाय) G1 3 गिरिश्रृङ्गेण (for शैल°) D6 T2 G2 M1 3 तथा (for तदा) —(l 5) D4 8 10 T G M1 3 स्वकाश्च (for मया°) D6 M3 पुरी (for पुन) —(l 6) D6 तु (for त्विह) G1 M1 विषादयुक्त (for °दास्त्विह) —(l 7) D4.8 10 transp. it and एनम्]

4 a) Ś1 D1 3.12.13 मायश्चा Ñ2 V2.3 B1 D7 लोकार्हो V1 B1—3 लोकार्हस्तु M1 राज्यार्हश्च (for मानार्ह) —b) C1

मा च रोषं कृथाः सौम्य मयि शत्रुनिबर्हण ।
याचे त्वां शिरसा राजन्मया बद्धोऽयमञ्जलिः ॥ ५
बलादस्मि समागम्य मन्त्रिभिः पुरवासिभिः ।
राजभावे नियुक्तोऽहं शून्यदेशजिगीषया ॥ ६
स्निग्धमेवं ब्रुवाणं मां स तु निर्भर्त्स्य वानरः ।
धिक्त्वामिति च मामुक्त्वा बहु तत्तदुवाच ह ॥ ७
प्रकृतीश्च समानीय मन्त्रिणश्चैव संमतान् ।
मामाह सुहृदां मध्ये वाक्यं परमगर्हितम् ॥ ८
विदितं वो यथा रात्रौ मायावी स महासुरः ।
मां समाह्वयत क्रूरो युद्धाकाङ्क्षी सुदुर्मतिः ॥ ९
तस्य तद्गर्जितं श्रुत्वा निःसृतोऽहं नृपालयात् ।
अनुयातश्च मां तूर्णमयं भ्राता सुदारुणः ॥ १०

G 4 9 11
B 4 10 15
L 4 7 54

N₁ D₁,₃,₄,₁₁,₁₃ स एवास्मि D₃,₁₃ समयेहं (for तदा चाह) D₁₃ पुरा यथा (by transp) C₂ यथापुर Ñ₂ V B₂,₄ D₇ यव माशाकरा यय —After 4ᵃᵇ, Ñ₂ V B D₇ ins.

197* अमात्यैर्विनियुक्तोऽह राज्ये नामेच्छया विभो ।

[V₁ [S]स्मि (for ऽह)].

while D₅,₆,₈-₁₀ S ins after 4ᶜᵈ

198* राजभावे नियोगोऽय मया त्वद्विरहात्कृत ।
सामात्यपौरनगरं स्थित निहतकण्टकम् ।

[(l 1) D₆,₈ T₃ G₃ M₁,₂ राजभाव; G₁ राजाभावे (for राजभावे) G₃ नियु**य (for नियोगोऽय) D₆ ₁₀ T₁ मम (for मया) —(l 2) D₆ पौरैर् (for पौर)]

5 ᵃ) Ś₁ Ñ V B D₁,₃,₄,₇,₁₂,₁₃ वीर (for सौम्य) D₆ reads from सौम्य up to निबर्हण in marg —ᵇ) Ś₁ Ñ V B D₁,₂,₄,₅,₇-₁₀,₁₂,₁₃ तिसू(D₁,₂,₄,₅,₇-₁₀ °षू)दन (for निबर्हण) —ᶜ) Ś₁ D₆,₁₁ एष ते(D₆ त्वा) D₃ याचे त्वां (for याचे त्वां)

6 ᵃ) Ś₁ D₁₃ G₃ विशाद् (for बलाद्) Ñ V₁,₃ B₁-₃ D₃,₄,₅,₇-₁₀,₁₃ T₃ G₂,₃ M₃ अस्मिन्, D₁,₁₁ मह G₁ अस्मात् (for अस्मि) V₃ समागत्य (for °गम्य) D₆ repeats from स in ᵃ up to ति in 7ᶜ after इति in 7ᶜ —ᶜᵈ) Ś₁ D₁₃ राज्यभार, D₁,₃ D₂,₄,₁₂ राज्यभारे, D₁,₈-₁₀ राज्यभावे, M₁ राजभाव (for राजभावे) Ñ₂ V B D₇ नियुक्तोऽस्मि D₆ नियुक्तो य (for °क्तोऽहं) D₆ शास्य (for शून्य) Ś₁ Ñ₁ D₁,₃,₄,₁₁,₁₃ त्वया हीने(D₁ त्वदपेते) पुरे (D₁,₂ °रा)द्य (Ñ₁ **) Ñ₂ V B D₇ राज्याय नहि मे स्पृहा (for ᵈ) D₆,₁₁ त्वया हीने पुरे राज्यपतित्वे नियोजित ❁ Ct शून्यदेशस्य राजहीनदेशस्य वा परैरनिभिभवनीया तया जिगीषुत्वहेतुना । मत्सकाशे भूत इतिवत्प्रयोग ❁ —After 6 Ñ V B D₇ ins

199* अनिच्छन्नपि विभोऽहमस्त्वया हीने पुरेऽनघ ।

[Ñ₁ om mostly the prior half V₁,₃ विभोऽह; V₃ विभोऽस्म (for विभोऽ°) V₁ पुरानघ (for °रेऽनघ)]

7 D₁ repeats up to इति in ᵃ (cf 4 1 6) —ᵇ) Ś₁ D₁₃ एव (for एव) D₁₀ [ज्ञा]त्रुवाणं Ś₁ D₂,₄,₁₁

तु (for मा) N₁ V B D₇ तसेवं(D₇ °दैव) भाषमाणं तु (V₂,₃ B च) —ᵇ) Ñ₂ V B D₇ मा निर्भर्त्स्य, D₅,₆,₈-₁₀ T₃ G₁,₃ M₃ विनिर्भर्त्स्य —ᶜ) Ś₁ समायुक्त, D₁₃ समायुक्त (for च मामुक्त्वा) Ñ₂ V B D₇ धिक्कृत्य(V₂ °**) परुषं वाक्य —ᵈ) B₁,₂ D₁,₄ तत्तदम्, D₁₃ तत्र (for तत्तद्) Ś₁ Ñ₁ V₂,₃ D₂,₁₁,₁₃ बहुशस्तद्, B₂ (before corr sup lin) प्रचुर तद् (for बहु तत्तद्) M₂ बहूनित्युवाच ह

8 ᵃ) Ś₁ Ñ₂ V B D₁,₂,₃,₁₂,₁₃ सु M₁ स (for च) V B समानाय्य (for °नीय) —ᵇ) Ś₁ D₁₃ स्वेच G₁ चापि (for चैव) Ñ₂ V B D₇ तदा स (B₁-₃ स तदा [by transp])प्लवगेश्वर, D₁₀ मन्त्रिणस्तु समाहित —ᶜ) Ś₁ Ñ₁ D₁,₃,₄,₁₂,₁₃ मामुवाच सुहृन्मध्ये —ᵈ) Ś₁ Ñ₂ V B D₁,₄,₇,₁₁,₁₃ एतत्सुदारुणं, Ñ₁ D₃,₁₁ एतद्विग° (for परमगर्हितम्).

9 ᵃ) T₃ हि (for वो) D₅,₆,₈-₁₀ मया रात्रौ G₁ M₂ महारात्रौ (for यथा रात्रौ) —ᵇ) D₆ स महास्वन G₃ सहसा सुर (for स महासुर) —D₇ om 9ᶜᵈ —ᶜ) T₁ क्रुद्धो (for क्रूरो) Ś₁ N₁ D₁,₃,₄,₁₂,₁₃ समाह्वयते नित्यं G₁ समाह्वयति क्रुद्धो Ñ₂ V B₂-₄ समाह्वयति(V₁,₃ °त) मां नित्यं, B₁ स मामाह्वयति मां नित्यं, D₂,₁₁ माह्वयामा(D₂ °न)स मां नित्यं —ᵈ) Ś₁ D₅,₆,₁₁,₁₃ G₁,₂ M युद्धकाङ्क्षी (for युद्धकाङ्क्षी) Ś₁ Ñ₁ D₁,₃,₄,₁₂,₁₃ रिपुर्मम(N₁ °हान्), Ñ₂ V B महासुर (V₃ °स्वन B₃ (m also) वनौकस), D₂,₁₁ सुदारुण, D₅,₆,₈-₁₀ T₃ G₁ M₁,₂ तदा(G₁ यथा M₃ तथा) पुरा G(ed) महोदर (for सुदुर्मति)

10 ᵃ) Ñ₂ तद्विनदं; Ñ₁ D₁ [भ]ई गर्जितं V₁ [भ]विगर्जितं B₃ (m also) तद्रवं D₅,₆,₈-₁₀ T₃,₅ G M₃ तत्क्वथितं M₂ तद्ध्वन G(ed) [भ]निगर्जितं (for तद्गर्जितं) —ᵇ) Ś₁ Ñ₁ D₁,₁₁,₁₃ G₃ निर्गतो (for निःसृतो) Ñ₂ V B D₇ [ऽ]स्मि (for ऽह) D₆ गतोऽहं च Ś₁ D₁₃ निजालयात्, Ñ₂ V B D₇ गुहामुखात् D₂,₁₁ पुरोत्तमात् (for नृपालयात्) —ᶜ) Ś₁ V₁ D₂,₁₃ अनुजा(D₂,₁₃ °ज्ञा)तश्च, N₂ °सृतश्च (for °यातश्च). Ś₁ V₁ D₁,₃,₄,₁₂ से(Ñ₁ मां) भ्राता V₁ B₁-₃ मां ईदृ D₆ मा तूर्ण (for मां तूर्णम्) —ᵈ) Ś₁ Ñ₁ D₁,₃,₄,₁₂,₁₃ स(D₆ ज) मवेद(D₁,₁₁ °क) G₃ भ्राता चैव (for अयं भ्राता) Ñ V B D₇ अयं(Ñ₁ D₇ अय) मातृसुतो रिपु

G 4 9 12
B 4 10 15
L 4 7 55

स तु दृष्ट्वैव मां रात्रौ सद्वितीयं महाबलः ।
प्राद्रवद्भयसंत्रस्तो वीक्ष्यावां तमनुद्रुतौ ।
अनुद्रुतस्तु वेगेन प्रविवेश महाबिलम् ॥ ११

तं प्रविष्टं विदित्वा तु सुघोरं सुमहद्बिलम् ।
अयमुक्तोऽथ मे भ्राता मया तु क्रूरदर्शनः ॥ १२

अहत्वा नास्ति मे शक्तिः प्रतिगन्तुमितः पुरीम् ।
बिलद्वारि प्रतीक्ष त्वं यावदेनं निहन्म्यहम् ॥ १३

स्थितोऽयमिति मत्वा तु प्रविष्टोऽहं दुरासदम् ।
तं च मे मार्गमाणस्य गतः संवत्सरस्तदा ॥ १४

स तु दृष्टो मया शत्रुरनिर्वेदाद्भयावहः ।
निहतश्च मया तत्र सोऽसुरो बन्धुभिः सह ॥ १५

11 a) N1 दूरात् (for रात्रौ) —b) Ś1 D18 अद्वितीय (for सद्वितीय) Ś1 Ñ1 D1 3 4 12 13 विनिर्गा(Ñ1 °ग)त (for महाबल) B2 मायावी स महासुर —c) D1 6 11 T2 G1 वित्रस्तो (for सत्रस्तो) Ñ2 V B D7 परमत्रस्त (for भयसत्रस्तो) —d) D3 11 भ्रात्रां च (for वीक्ष्यावां) D3 11 तद्(D11 °म)भिद्रुतौ, D5 8 10 समुपागतौ D6 T2 G2 M2 समभि° T1 3 G1 3 M1 समनु° (for समनुद्रुतौ) —e) T1 3 M3 च (for तु) D5 6 8–11 T2 G2 M2 अभिद्रुतस्तु (D11 °श्च) D3 अभिद्रुतश्च [sic] M1 अभिद्रवस्तु (for अनुद्रुतस्तु) —f) D5 6 8–10 T2 G M1 3 विवेश स (for प्रविवेश) D1 11 महद्बिलं (for महाबि°) —After 11, D3 ins l 3 4 of 201*

12 D1 6 11 T2 M3 om (all [except D3] hapl) 12ab —For 11e–12b Ñ2 V B D7 subst

200* प्राद्रवत्परमत्रस्त पृष्ठतोऽनवलोकयन् ।
विद्रवन्तं तथा तं च निशाम्य शुचि दानवम् ।
भ्रात्रोच सहसुग्रीवस्तिष्ठ तिष्ठत्यभाषित ।
स तु द्वादशमात्राणि योजनानि प्रधावित ।
सतो धरण्या विवर प्रविवेश भयार्दित ।　　[5]
तं तु दृष्ट्वा बिलप्राप्तं सपदं नित्यशोऽहितम् ।

[(l 1) Ñ2 D7 नावलोकयन् —(l 2) B1 तदा (for तथा) V B1–3 निशम्य (for °शाम्य) —(l 3) Ñ2 D7 इह (for सह) —B3 om l 4 —(l 5) V1 भयातुर (for भयार्दित) —(l 6) B1 दृष्ट्वाह B2 3 दृष्ट्वा च (for तु दृष्ट्वा) Ñ2 D7 मयार्त (for सपदं) V नित्यशोभिन]

—c) Ñ2 V1 D7 मया V2 3 B [s]थमो (for ऽथ मे) —d) Ñ2 V B D7 11 शुचिना (for मया तु) M1 क्रूर निदर्शन (for तु क्रूर°) —For 11e–12 Ś1 Ñ1 D1 4 12 13 subst D3 ins l 3–4 after 11

201* त्वरित प्राद्रवद्भ्राता पृष्ठतो मावलोकयन् ।
विद्रवन्तं ततो दृष्ट्वा निशायां तत्र दानवम् ।
अहं भ्राता च सुग्रीव सह यान्तं व्यवस्थितौ ।
रोषवादेन तु मया भाषितो हरिपुंगव ।
अयमुक्तोऽनुविभ्राता विपुल रोषवर्धन ।　　[5]

[(l 1) D12 त्वरितं (for °त) D1 4 4 13 भीत (for भ्राता) D13 पृष्ठतो (for पृष्ठतो) Ñ1 [s]नवल D1 मां वि ; D4 वावि D4 नावल D13 वाव (for माव) —(l 2) D1 तत्र वन —(l 3) D13 वा (for first च) Ñ1 सहसा समवस्थितौ D1 सहसानुव्यवस्थितौ, D4 सह चानुव्यवस्थितौ D12 सहसा तु व्यवस्थितौ (for the post half) —(l 4) Ś1 रोषवादेन D1 रोषेण नेव (for रोषवादेन) D12 पार्श्वतो (for पार्श्वस्थो) —(l 5) D1 शुचि (for ऽनुवि°) Ñ1 अतीव च मया भ्राता (for the prior half)]

13 a) V B D7 बुद्धि D1 3 11 शक्ति ; D4 गन्तुं (for शक्ति) —b) D4 दातुम् (for गन्तुम्) D4 व्यतिगन्तुम् B1 अहं D7 अत्र (for इत) D11 प्रतिगम्यामि तां पुरीं —c) Ś1 D1 4 11–13 G1 द्वारे (for °द्वारि) Ś1 Ñ1 V B D1–4 7 11–13 प्रतीक्षस्व (for प्रतीक्ष त्वं) —d) Ś1 Ñ1 D1 3 4 12 13 यावदागमनाय (D1 4 12 13 °नं स) मा Ñ2 V B D7 [इ]त्युक्त एव मया तदा (Ñ2 D7 तदा मया [by transp)]

14 a) Ś1 Ñ V B D1–3 7 13 T1 G2 [स]हं G1 तद् (for तु) —b) Ś1 Ñ1 D1–4 11–13 तद् ; Ñ2 V B D7 G1 तद्, D5 8–10 T2 तु (for ऽहं) Ś1 Ñ1 D1–4 11 13 महा (D3 11 °हद्)बिलं Ñ2 V B D7 बिलं महत् (for दुरासदम्) —After 14ab Ś1 Ñ1 D1 4 12 13 ins

202* प्रविष्टो यत्र दुष्टात्मा दुन्दुभेः पूर्वजः सुतः ।

[Ñ1 D4 पूर्वजो दुदुभे (by transp)]

—c) D4 न (for तं) Ñ2 V B D7 द्वारे मे (for तं च मे) D5 8 10 T2 G1 3 M1 3 तं मे मार्गयतस्तत्र D3 तमेव मार्गन् तस्य —d) Ñ2 V B D2 3 7 साग्र (V1 °ग्रो) (for गतः) Ś1 Ñ V B1 D1–4 7 11–13 संवत्सरो गतः ; B1–3 संवत्सरो भवत्

15 a) Ś1 Ñ1 D1 3 4 12 13 हि (for तु) D4 दृष्टो D7 दृष्टो (for दृष्टो) —b) B1 अनिर्वेदो (for °दाद्) D1 भयार्दितः ; D3 11 भयानक (for °वह) Ś1 D1 4 12 13 अ (D4 स)निर्वेदभयार्दित —c) B2 3 नि गृहस्य (for निहतश्च) D1 13 विराट् (for मया) Ś1 Ñ1 D1 3 4 12 13 पुरा ; Ñ2 V B D2 3 7–10 सदा ; G1 तत्र (for तत्र) —d) Ś1 Ñ1 D1 3 4 12 13 सानुग (D12 °ग) सह बांधवः ; D1 4 5 8 10 T2 G1 3 M1 3 स सर्वैः (D1 T2 G2 स तदा ; G1 M1 3 सर्वैश्च) सह बंधुभि

तस्यास्यात्तु प्रवृत्तेन रुधिरौघेण तद्बिलम् ।
पूर्णमासीद्दुराक्रामं स्तनतस्तस्य भूतले ॥ १६

सूदयित्वा तु तं शत्रुं विक्रान्तं दुन्दुभेः सुतम् ।
निष्क्रामन्नैव पश्यामि बिलस्य पिहितं मुखम् ॥ १७

विक्रोशमानस्य तु मे सुग्रीवेति पुनः पुनः ।
यदा प्रतिवचो नास्ति ततोऽहं भृशदुःखितः ॥ १८

पादप्रहारैस्तु मया बहुशस्तद्विदारितम् ।
ततोऽहं तेन निष्क्रम्य यथा पुनरुपागतः ॥ १९

तत्रानेनास्मि संरुद्धो राज्यं मार्गयतात्मनः ।
सुग्रीवेण नृशंसेन विस्मृत्य भ्रातृसौहृदम् ॥ २०

एवमुक्त्वा तु मां तत्र वस्त्रेणैकेन वानरः ।
तदा निर्वासयामास वाली विगतसाध्वसः ॥ २१

तेनाहमपविद्धश्च हृतदारश्च राघव ।
तद्भयाच्च मही कृत्स्ना क्रान्तेयं सवनार्णवा ॥ २२

ऋश्यमूकं गिरिवरं भार्याहरणदुःखितः ।
प्रविष्टोऽस्मि दुराधर्षं वालिनः कारणान्तरे ॥ २३

G 4 9 28
B 4 10 25
L 4 7 68

16 ^{a}) D3 11 [आ]स्यात ; D8-10 [पृ]व च (for [आ]स्यात्तु). Ñ1 G1 च प्रवृत्तन V2 3 सप्रवृत्तेन (for तु प्र°) Ś1 D5 6 12 13 भास्यात्तु सप्रवृत्ते(Ś1 D12 °द्धे)न —^{b}) G1 रुधिरेण च (for °रौघेण) —^{c}) Ñ1 D12 (before corr) पूर्णम् (for °र्णम्) Ñ1 D5 6 12 दुराक्रान्त, V3 गुहाद्वार, B1-3 दुराक्रोश, D3 11 G3 दुराक्रम्यं (for दुराक्राम) V1 3 पततस्, B1-3 D6 स्वनतस्, M1 नदतस् (for स्तनतस्) Ñ1 चास्य (for तस्य) D3 11 घटोदय इवोदधि .

17 ^{a}) D5 13 अर्दयित्वा (for सूद°) G2 3 च तं, M3 ततस् (for तु तं) Ñ2 V B D7 मायाविनं सूदयित्वा —^{b}) D5 विक्रम्य, D6 विश्रान्तस्, G1 M3 बलिनं, M1 विख्यातं (for विक्रान्तं) M3 प्रियं (for सुतम्) D5 6 8-10 T G2 3 Ct समरे सुखं, Cg as in text (for दुन्दुभे सुतम्) Ś1 Ñ1 D1-4 11-13 मायाविनमहं तदा(D5 11 तत) Ñ2 V B D7 तं शत्रुं दुंदुभिप्रियं(B4 °भे सुत) ॐ Ct m अत्रैकस्तच्छब्द प्रसिद्धिपर । Ck सुखं यथा ॐ —^{c}) Ñ1 V1 D7 नि क्रमन्, V2 D11 13 नि क्रामन् , V1 Ck निष्क्रमन् (for निष्क्रामन्) Ś1 Ñ1 D5 6 11 13 न तु, D1 न नु, D3 नात्र, D8-10 T1 G1 3 नेह, D11 M1 न च T3 G2 M3 नेव, Ck as in text (for नैव) Ñ2 V B D7 चापश्यं (for पश्यामि) —^{d}) B D1 13 G2 M1 [अ]पिहित

18 ^{a}) Ś1 Ñ1 D1 3 6 12 13 मम विक्रोशतश्चैव, Ñ2 V B D7 विक्रोशतोऽपि हि मम(B2 m also सुमहत्) —^{c}) Ś1 D1 13 मम, D5 6 8-10 T1 G1 3 M1 3 यत , T2 यथा (for यदा) D3 11 नासीत् (for °स्ति) —^{d}) Ś1 Ñ1 D1 6 11-13 तदा(Ś1 D1 13 °द)हं (for ततोऽहं) M1 प्रति (for भृश) Ñ2 D7 मन्युमें वाभवत्तदा, V B मन्युमान(V2 °हाइ)भव त्तदा(B1-3 °त)

19 Ś1 Ñ1 D5 6 12 13 om 19 —^{a}) Ñ2 V B D7 च (for तु) —^{b}) D1 8-10 T G2 3 M1 3 बहुभिस् (for बहु शस्) D6 तु T2 3 G2 3 M3 तं T1 M1 सु (for तद्) D6 T1 G2 3 M3 Cv विदारितं । T3 निपातितं , T2 विदारितं (for विदारितम्) —D1 reads 19^{cd} in marg —^{c}) V2 3 (for ...) D11 नि क्रम्य D5 6 निष्क्राम्य (for निष्क्रम्य) —^{d}) D3 11 G3 Cg k t यथा, D3 यदा, M1 यस्मात्, Cm as in text (for यथा) D5 8-10 G1 M2 3 पुरम् (for पुनर्) D3 11 M3 इहागत (for उपा°) Ñ2 V B D7 यथागतमिहागत ॐ Cm यथा शब्दो वाक्यालंकारे ॐ

20 ^{a}) Ñ V B1 D1 3 7 11 तद् , D6 M3 Cg अत्र (for तत्र) Ñ2 V B4 D7 [पृ]तेन, B1-3 तेन (for [अ]नेन) Ś1 D5 6 12 13 कपटेन (for तत्रानेन) —^{b}) D6 8-10 G1 M2 Ct मृगयता Cm as in text (for मार्ग°) Ś1 Ñ1 D1 3 12 13 अविच्छताऽमुना(Ñ1 °ता पुन D1 3 13 °ता पुरा) Ñ2 V B D3 7 11 G2 M3 मार्गयता तदा(G2 M3 °तात्मन) —^{d}) Ś1 D1 3 4 12 13 न स्मृत्व Ñ2 V2 3 D7 विसृज्य (for विस्मृत्य) D2 13 M3 गौरवं (for सौहृदम्)

21 ^{b}) Ś1 Ñ1 D1 3 6 12 13 वाससा (for वस्त्रेण) D3 11 राघव (for वानर) —^{c}) B1 3 ततो, D3 11 वाली (for तदा) Ñ2 V B D7 निष्का(D7 °ष्क)सयामास G3 निर्धाव्य° (for निर्वासयामास) T2 3 M3 निर्वासयामास तदा (by transp) M1 तदानीं ताडयामास —^{d}) D3 11 तदा (for वाली) G3 विहत (for विगत) B3 5 D3 6 स वाली गतसाध्व(D6 °भाग)स D2 13 सोऽतीव्रगतमानस

22 ^{a}) D3 11 M1 (after corr as in text) [अ]पि (for [अ]प) —^{b}) Ś1 Ñ1 D1-6 11 13 मानद (for राघव) —^{c}) Ś1 Ñ1 D1 3 4 12 13 मही कृत्स्ना D3 3 10 मही सर्वा (for मही कृत्स्ना) —^{d}) D3 11 भ्रांता मे D6 8-10 भ्रांतवान्, D6 भ्रांतेयं (for क्रान्तेयं) D5 6 8-10 सवनार्णवां (for °र्णवा) Ś1 D1 3 6 12 13 विचरामि मुदु गित (D3 12 समतत) Ñ1 माद्दोऽस्मि विचरामि

23 ^{ab}) Ś1 ऋषिमूकं D(except D7) ऋष्य° (for ऋश्य°) Ś1 Ñ2 V1 D1 3 4 12 13 M1 कृति(Ś1 V1 D11 °र्वि)त (for दुःखित) —^{d}) D12 वालिना (for °न) —For 22-23 Ñ2 V1(1 1-6 for 22 only)-3 B D7 subst D5 ins. 1 2 4 after 22^{cd}

203* इत्थं तत्रास्मि निहतो पश्यतो रघुनन्दन ।
हृतदारो हृतश्रीको दुःखार्त इव द्विज ।
मद्भये कृपणुद्विग्न विनि मृतं गुहागुहाम् ।
वासयामास मां वाली दृष्ट्वा मुमुदे दारुणम् ।

G. 4. 9. 29 B. 4. 10. 29 L. 4. 7. 69

एतत्ते सर्वमाख्यातं वैरानुकथनं महत् ।
अनागसा मया प्राप्तं व्यसनं पश्य राघव ॥ २४
वालिनस्तु भयार्तस्य सर्वलोकाभयंकर ।
कर्तुमर्हसि मे वीर प्रसादं तस्य निग्रहात् ॥ २५
एवमुक्तः स तेजस्वी धर्मज्ञो धर्मसंहितम् ।
वचनं वक्तुमारेभे सुग्रीवं प्रहसन्निव ॥ २६
अमोघाः सूर्यसंकाशा ममेमे निशिताः शराः ।
तस्मिन्वालिनि दुर्वृत्ते पतिष्यन्ति रुषान्विताः ॥ २७
यावत्तं न हि पश्येयं तव भार्यापहारिणम् ।
तावत्स जीवेत्पापात्मा वाली चारित्रदूषकः ॥ २८
आत्मानुमानात्पश्यामि मग्नं त्वां शोकसागरे ।
त्वामहं तारयिष्यामि कामं प्राप्स्यसि पुष्कलम् ॥ २९

इति श्रीरामायणे किष्किन्धाकाण्डे दशमः सर्गः ॥ १० ॥

तन्नयाश्च मया सर्वा पृथिवी सागराम्बरा । [5]
पर्वतैश्च समाकीर्णा चरिता रघुनन्दन ।
ततोऽहमेतच्छैलेन्द्रमृष्यमूकमुपागतः ।
कारणायन दुर्धर्षं शैलं वाली व्यसर्जयत् ।

[(l. 2) D5 इत्यतो (for हत्श्रीको) —(l. 3) V1 *** (damaged) (for °दिशः) —(l. 4) D7 प्रामवासास (for प्रामया°) Ñ2 V1 B4 D2 उत्पात्य (for उत्पा*) V2 इहु* * * * * * (illeg.) —(l. 7) V3 D7 एत V3 एक (for एतत्) V2 समागत (for उपा°) —(l. 8) Ñ2 B1 कारणान्तर, V2,3 कारणान्येन (for °णायेन) Ñ1 दुर्धर्षं V2 * * * (illeg.) (for दुर्धर्षं)]

24 ᵃ) Ś1 D7 वैरादि(D7 °दे)कारणं, Ñ1 D1,4,12 वैरादिकरणं, Ñ2 V2,3 B D7 वैरस्यागमनं, D12 वैरस्य कारणं (for वैरानुकथनं) D5,11 वैरस्योत्थानकारणं —ᶜ) B4 अतस्तु तन् (for अनागसा) Ñ2 V2,3 B D7 प्राप्य (for °प्तं) —ᵈ) Ñ2 V2,3 B D7 पश्य राघव संशय

25 ᵃ) D13 वालिना Ś1 Ñ1 D1-4,12 M2 हि, D9-10 च, D11 से, T2 [अ]स्य (for तु) Ñ1 D12 भयात्तस्य (for भयार्तस्य) Ñ2 V2,3 B D7 वालिग्रासादिद्धार्तस्य, V1 वालिना तिमयार्तस्य D5 वालिहतभयार्तस्य —ᵇ) Ñ1 V1 D1,4-6,8-10,13 T2 G1 M2 सर्वलोक(Ñ1 G1 M2 °भूत)भयाप(Ñ1 D1 °च)ह; Ñ2 V2,3 B D7 कृष्णप्राणस्य राघव, G3 M1 सर्वलोका(M1 भूता)भयावह —ᶜ) D5,11 वीर त्वं (for मे वीर). —ᵈ) Ś1 Ñ1 D1-4,11-13 नि(D1 नि)ग्रहे: D8 निग्रहात् (for निग्रहात्) Ñ2 V2,3 B D7 अरदस्य(B4 * * *)पन्नर्थ (B4 °पर्न [meta.]) विभो. B2 (marg. also) तस्य पापस्य निग्रहे

26 ᵃ) Ñ2 D1,7,11 T2,3 G M2 तु (for स) —ᵇ) D5,11 धर्मवत्सलः; D12 T2 °सहित (for °संहितम्). Ñ1 V2,3 B D7 सुग्रीवेण पार्थव —ᶜ) Ñ2 V2,3 B D7 काशालवितुम् —ᵈ) Ñ2 V2,3 B D7 रघुनंदन (for प्रह°).

27 ᵇ) Ś1 D4,12 ते: Ñ1 V B D5,8,11-13 M [इ]मे: D7 [इ]ह (for [इ]मे) D6,8-10 निशिता मे शरा इमे —ᶜ) G1 तस्मिन् (for तस्मिन्) Ñ2 V B D7 सुग्रीव. D5,11,12 दुर्वृत्तं, D13 lacuna (for दुर्वृत्ते) —ᵈ) Ñ1 D1,12 सुदारुणा, Ñ2 V B D7 मयेरिता (for रुषान्विताः) ※ Cl. रुषान्विता कुपितेन मया विसृष्टा इत्यर्थः । निमित्तनिमित्तिनोरभेदोपचाराद् वाच्छल्यम् ।. Ct. रुषान्विताः रुषेव मया पातिता ※ Ś1 D4,12 निपतिष्यन्ति दारुणाः, M3 निपतिष्यन्ति वेगिताः

28 ᵃ) Ś1 Ñ1 D4,5,11,12 नेह, Ñ2 V2,3 B4 D7 हि न (by transp.) G1 M2 युधि (for न हि) Ś1 B1 D1,4,11,12 T1,3 G3 पश्यामि (for °श्येयं) D1 यावत्तमिह पश्यामि, D5,11 यावद्धि तं न पश्यामि, M1 यावत्तमभि पश्यामि —ᶜ) Ś1 D4,12 तावज्जीवति (for तावत्स जीवेत्). Ñ V B D5,11,12 ता(V2 या)वज्जीवेत्स(B4 D5 °त) दुरात्मा (D13 मायात्मा) —ᵈ) Ś1 D12 शुभ, Ñ1 D1,4,12 तत्र (for वाली) B4 चरित (for चारित्र) Ś1 (before corr.) D1-4,11-13 °दूषण, D6 दूषित (for °दूषक)

29 ᵃ) D1,12 आत्मानमिव (for आत्मानुमानात्) Ñ2 V2,3 D D7,11 जानामि (for पश्यामि) —V1 illeg. for 29ᵇ —ᵇ) Ñ1 V2 D1-4,8-11 T1 C1 मग्नमेव (for मग्नं त्वां) D6 दुःख (for शोक) —ᵈ) Ś1 D4,12,13 यावद् Ñ1 D1,11 यावद्, D6,10 Ct यावत् T1 सार्थ, M1 पुनः (for कामं) Ś1 Ñ1 प्राप्स्यसि (for °प्स्यसि) D6 पुष्कलं (for पुष्कलम्) —For 29ᶜᵈ, Ñ2 V B D7 subst.

204* अथ वालिनि मोहयामि राजकोषमागतम् ।

[Ñ2 V2,3 B4 D7 राज्ये (for राज्य)]

—Thereafter V2 B4,8 cont., while Ś1 Ñ1 D1-4,11,12 ins.

205* रायवेणैवमुक्तस्तु सुग्रीवो वानरोत्तमः ।
प्रहर्षमतुलं लेभे प्रहृष्टश्चेदमब्रवीत् ।
प्रसादात्तव काकुत्स्थ यथा वदसि राघव ।
त्वमलं समरे जेतुं सेन्द्रानपि दिवौकसः ।
यथा हि लोकस्य चराचरस्य [5]
दिवाकरो भाति हि रश्मिमाली ।
यथा हि सर्वेषु मृगेषु केसरी
तथा नरेन्द्र त्वमुदारविक्रम ।

११

रामस्य वचनं श्रुत्वा हर्षपौरुषवर्धनम् ।
सुग्रीवः पूजयांचक्रे राघवं प्रशशंस च ॥ १
असंशयं प्रज्वलितैस्तीक्ष्णैर्मर्मातिगैः शरैः ।
त्वं दहेः कुपितो लोकान्युगान्त इव भास्करः ॥ २
वालिनः पौरुषं यत्तच्च यच्च वीर्यं धृतिश्च या ।
तन्ममैकमनाः श्रुत्वा विधत्स्व यदनन्तरम् ॥ ३
समुद्रात्पश्चिमात्पूर्वं दक्षिणादपि चोत्तरम् ।
क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः ॥ ४

G 4 8 4
B 4 11 4
L 4 6 23

[(l 1) V3 एवमुक्त स रामेण (for the prior half) D1 धानरेश्वर (for °रोत्तम) V3 सुग्रीव स महायशा (for the post half) —V3 illeg for l 2-3 —(l 4) Ñ1 V1 B1.2 D1-4.12 स्व दहे कुपितो राम (for the prior half) D1 सुरासुरान् (for दिवौकस) —(l 6) Ñ1 V1 B1.2 गभस्तिमाली (for हि रश्मिमाली) —(l 7) D13 तथा (for यथा) Ñ1 V1 B2.3 D1.4.12.13 च (for हि) V3 सर्वे V3 illeg for मृगेषु केसरी —(l 8) Ñ1 V1 B2.3 D1-4.13 नरेषु D12 नृपेषु (for नरेन्द्र).]

—After 29, D1.2.8-10 S ins while Ñ1 V B D12 ins before Sarga 11

206* तस्य तद्वचनं श्रुत्वा राघवस्यात्मनो हितम् ।
सुग्रीवः परमप्रीतः सुमहद्वाक्यमब्रवीत् ।

[Cf 4 11 1 B4 om l 1 —(l 1) Ñ2 V2.3 B1-3 D1 G2 स तु (for तस्य) D8-10 हर्षोपेतवचन (for the post half) —(l 2) G(ed) वाक्यमिदं (for परमप्रीत) V1 illeg for the post half Ñ2 V2.3 B D7 पुनर्वचनम् (for सुमहद्वचनम्)]

Colophon Ñ2 V2 B1.4 D7 om (Sarga cont) V2.3 B2.3 read colophon after 205* —*Sarga name* Ś1 D1.4.11.13 सुग्रीवराज्यं, Ñ2 सुग्रीवाश्वासनं V1 B2.3 सुग्रीव(V1 ***)वैरनिवेदनं V3 रामा *** (illeg) D1 सुग्रीवसमाश्वासनं, D3.11 सुग्रीववैरोपाख्यानं —*Sarga no* (figures words or both) Ś1 Ñ1 V1 B2.3 D1.2.12 om D1 6 D11.13 7 —After colophon G concludes with श्रीरामाय नमः

11

M1 begins with श्रीरामाय नमः

1 Ñ2 V B D5(repeats them in their proper place) read 1-6 after 162* D10 om from 1 up to प्रश in 2ᵃ —ᵃ) M2 तस्य तत् (for रामस्य) D1 (second time) तत्(D11 च च)च (for वचनं) Ñ2 V B1.2 D1 तद्वचस्तस्य श्रुत्वा —ᵇ) D1 (first time) श्रीतिमाधैर्य, D5 पूजयामास (for पूजयांचक्रे) —ᵈ) B1 T1 राघव (sic) D1 (first time) वीर्यं (for राघवं) [illegible] (for प्रशशंस च) D1 (second time) वीरमब्रवीत् (for प्रशशंस च) —For 1, Ś1 Ñ1 D1.4.11.13 subst.

207* स तु तद्वचनं श्रुत्वा राघवस्य महात्मनः ।
सुग्रीवः परमप्रीतः काकुत्स्थमिदमब्रवीत् ।

[(l 2) D1.4.13 वचः (for परम) D1 पुनः (for °प्र°)]

2 *D10 om up to प्रज्व in* ᵃ (cf v l 1) Ś1 Ñ1 D1.4.12.13 read 2-6 after 4 8 24 —ᵃ) Ñ2 D7 दीप्तैस्तैः (for प्रज्वलितैः) —ᵇ) D8 तीक्ष्णो (sic) (for तीक्ष्णैः) —ᵈ) Ñ2 V B1-3 D7 दहेस्त्वं (by transp) D4.11 त्वं दहेत् D12 आदहेत् (for त्वं दहेः) V3 कुपितान् (for कुपितो) —ᵈ) D5 युगांतम् (sic) (for युगान्त) Ś1 Ñ V B D1-4(D5 first time) 7.11.13 युगान्ते रश्मिवान्(Ñ1 B1 °मा)निव, D5(second time) 11 युगान्तादित्यवत्त्विव

3 ᵃ) D13 पुरुषं (sic) (for पौ°) Ś1 Ñ1 D1-4(D5 first time) 11.12 पौरुषं, Ñ2 V B1-3 D5(second time) 6(marg) 7.11 G1 M2 यत्र B1 तेजो G2 यत्तु (for यत्तत्) —ᵇ) Ñ1 V B1-3 D7 धैर्यं(Ñ2 V2 °र्ये) तेजो, B4 बलं वीर्य (for यच्च वीर्यं) D1 यथा च यत् (for धृतिश्च या) Ś1 D12 यच्च धैर्यं यशस्तथा, Ñ1 यच्च धैर्यं बलं च यत्, D1-4(D5 first time) 11 यच्च(D12 °त्र) धैर्यं यश्च स्थयं(D1.4 °र्यं च यत्) D5(second time) 11 यच्च(D11 धृयं) शौर्यमादिश —ᶜ) B1-3 तन्ममैव वचः D4 तत्समेक, M2 (before corr as in text) तन्ममैक° (for तन्ममैकमनाः) —ᵈ) V1 illeg for 1 3 यदनन्तरम् D1 विधत्व (for विधत्स्व) D1 first time) 7.9 यद्वक्ष्ये(D5 मम°) (for यद°) Ñ Cm यत्तद्वीर्य पाल्यादाक्षादिकं तत्सर्वमावरणं सावधान. श्रुत्वा यदितो मत्प्रतिबिम्बितसम्भवं च योजनीयम् । तत्परतया अहमपि सुग्रीववालिविषयस्त्वं पाश्चात्येन । उभयोर् पुनरप्याह प्रबोधायेति

4 ᵃ) Ś1 V1 D12 पूर्वात् (for पूर्वं) —ᵇ) V2 समुद्राद् (for दक्षिणाद्) —V3 illeg from दि up to l 27 of App I (No 7) Ś1 D12 [उ]त्तरात् G1 (before corr) उत्तरं (for उत्तरम्) D1 दक्षिणान्मूर्धन्योत्तरं —D1 reads 4ᵃᵇ in marg —ᶜ) Ñ1 D1.4(both times) 5.13 क्रमत्युदिते(D5 °ते) —ᵈ) B1 वानर B3 वालिनामा D1 °क्लमः D13 च विगतश्रमः D1 °गतक्लमः (for व्यपगत°) Ñ Cm G(ed) वानुवीर्यं वायुवेगः संचारलक्षणम् । इमं सुदूरमाशर्यं वाली नित्य मुहूर्तमात्रमनुसरतोर्यो लोकपालकसाक्षात्कार इति

G 4 6 5
B 4 11 5
L 4 6 20

अग्राण्यारुह्य शैलानां शिखराणि महान्त्यपि ।
ऊर्ध्वमुत्क्षिप्य तरसा प्रतिगृह्णाति वीर्यवान् ॥ ५
बहवः सारवन्तश्च वनेषु विविधा द्रुमाः ।
वालिना तरसा भग्ना बलं प्रथयतात्मनः ॥ ६
महिषो दुन्दुभिर्नाम कैलासशिखरप्रभः ।
बलं नागसहस्रस्य धारयामास वीर्यवान् ॥ ७
वीर्योत्सेकेन दुष्टात्मा वरदानाच्च मोहितः ।
जगाम स महाकायः समुद्रं सरितां पतिम् ॥ ८
ऊर्मिमन्तमतिक्रम्य सागरं रत्नसंचयम् ।
मम युद्धं प्रयच्छेति तमुवाच महार्णवम् ॥ ९
ततः समुद्रो धर्मात्मा समुत्थाय महाबलः ।
अब्रवीद्वचनं राजन्नसुरं कालचोदितम् ॥ १०
समर्थो नास्मि ते दातुं युद्धं युद्धविशारद ।
श्रूयतामभिधास्यामि यस्ते युद्धं प्रदास्यति ॥ ११
शैलराजो महारण्ये तपस्विशरणं परम् ।
शंकरश्वशुरो नाम्ना हिमवानिति विश्रुतः ॥ १२

---

5 V3 illeg for 5 (cf v l 4) —a) Ñ2 V1 2 B1-3 D7 अग्राण्यारुह्य, D1 अग्राण्यासुष्य (sic) D3(second time) 11 आरुह्याग्राणि (for अग्राण्यारुह्य) —c) D8 9-10 Cs उत्पा(D4 °रुप)त्य, D7 आक्षिप्य (for उत्क्षिप्य) —d) Ś1 D1 गृह्णातीव च, D3 4 13 प्रगृह्णाति च (for प्रतिगृह्णाति)

6 V3 illeg for 6 (cf v l 4) —a) D13 बहव शाखताश्चैव —b) V3 विविध, D3(second time) 11 विपुला (for विविधा) —c) V3 सहसा (for तरसा) —d) Ñ1 विज्ञातुमिच्छता, V2 B2-4 जिज्ञासया(V2 B2 [sup lin also] °ता)त्मन, D7 जिज्ञासुना°, G2 दर्शयता° (for प्रथयतात्मन) Ś1 D1-4(D3 first time) 12 13 ब(Ś1 फ)लं स्व(D1 त्व) ज्ञातुमिच्छता(D13 °त) Ñ2 V1 बल जिज्ञासुना(V1 °सता)त्मन, B1 D3(second time) 11 बलजिज्ञासयात्मन —After 6 Ś1 Ñ V B D1-4(D3 first time) 7 12 13 ins a passage relegated to App I (No 7) —After 6 D3(second time) 11 ins.

208* शृणु चापि रघुश्रेष्ठ विस्तरेण कथामिमाम् ।

7 a) G2 -सदृश (for शिखर) D3 11 वीर्यवान्सुमहाबल, Cv r as in text —For 7ab, Ś1 Ñ V B D1 2 4 7 12 13 subst while D3 11 cont after 210*

209* आसीन्महासुर कश्चिद्दुन्दुभिर्नाम नामत ।

[Ñ2 V B D7 पूर्वं (for कश्चित्) Ñ1 V B D7 राघव (for नामत)]

—After 7ab, D3 11 ins

210* यथा स निहत पापो वालिना पुरवर्मणा ।

—Then cont 209*.

—d) B1 3 धारयंश्च स, L(ed) धर° (for धारयामास)

8 a) Ñ2 V B D3 वीर्योत्सुक स(V1 °कन) D4 8-10 T G2.3 स वीर्योत्सेक (D10 °ए) M2 स वीर्यवान्, Cg as in text (for वीर्योत्सेकेन) D13 वीर्योत्सुकेन धर्मात्मा —b) Ñ1 D8 9-11 T1 वरदानेन (for °नाच्च) Ś1 Ñ2 D1 2 4 12 13 विमोह (for मोहित) —c) Ś1 Ñ1 V2.3 B2-4 D1-4 11-13 स जगाम (by transp) V1 B1 समागम्य, D3.9 T G2 M °म सु (for जगाम स) V2 V B D7 महाबाहु (for °काय)

9 D7 om 9 —a) Ñ2 V1 B समासाद्य, D3 11 अभिप्रेक्ष्य (for अतिक्रम्य) Ś1 D1 2 4 12 13 सोऽभिपत्योर्मिसबाध (D1 °भत्त त, D2 13 °मतं तु) Ñ2 सोऽभिपत्यार्मिसवर्तं (sic) V1 2 ऊर्मिवन्त(V2 °न्त्य) समासाद्य —b) Ś1 Ñ V B D1 2 4 12 13 वरुणा(Ñ V B मकरा)लय (for रत्नसंचयम्) —c) B2 (sup lin also) D2 समयुद्ध, T2 3 M1 2 मम युद्धे (for मम युद्धं) —d) Ñ2 V B M1 स (for तम्) V3 चोवाच (for उ°)

10 b) Ś1 Ñ V1 2 B1 2 D1 4 7 11 13 महात्मन, V2 °सुर, B3 °त्मन, D2 °मना (for °बल) —D12 om 10cd —c) Ñ1 V D1-3 D7 दैत्य, B4 धैर्यं, D3 12 राम (for राजन्) Ś1 D4 त सुसंक्रुद्धम्, D3 8.13 सम(D3 समि)द्धं क्रुद्धम् (for वचन राजन्) Ñ1 ममवीत्सुमहत् क्रुद्ध —d) D3.11 तार्द(D11 °मि)दं (for असुर) D1 4 11 13 कालनोदित Ñ2 V B D7 राम कालप्रचोदित

11 a) D3 13 [अ]स्मि (for [ना]स्मि) D13 मे (for ते) D3 13 असमर्थो ह्यह G3 न समर्थोऽस्मि ते (by transp) (for समर्थो नास्मि ते) Ñ2 V B D7 न ते(D7 ते न [by transp]) दातुं समर्थोऽहं —b) D2 reads युद्ध in युद्धविशारद in marg D13 om दं युद्ध D1 विशारद (for °द) D3 11 तव युद्ध महाबल —c) V1 श्रावताम् I B3 श्रीमताम् (for श्रूयताम्) D8 9-10 T2 वक्ष्मि ; T1 M1 2 वामि (for अभि) —d) D4 प्रयास्यति (for प्रदा°) Ñ V B D7 येन(V1 द्वंद्व) युद्धं तव क्षम D3 11 द्वंद्व युद्ध तव क्षम

12 a) D1 शैलराजं (for °राजो) V1 D13 महारण्यस्य, D1 °पुर्यां, D4 °रण्यस्य (for °रण्ये) —D12 om 12d–13a —b) V3 B4 D8 M2 शरणो (for °णं) V2 V2 3 D3 7 महान् ; D3.11 M1 पर: (for परम्) V2 तपस्विनामतो महान् Cg: Cg पठें तपस्विशरणं तपस्विनां परमावासस्थानम् । विस्मयपुंसकम् ॥

☞ In V1, the portion from श्वशुरो in c up to दुन्दुभिम् in 29b is missing. In its place a fol of

गुहाप्रस्रवणोपेतो बहुकन्दरनिर्झरः ।
स समर्थस्तव प्रीतिमतुलां कर्तुमाहवे ॥ १३
तं भीतमिति विज्ञाय समुद्रमसुरोत्तमः ।
हिमवद्वनमागच्छच्छरश्चापादिव च्युतः ॥ १४
ततस्तस्य गिरेः श्वेता गजेन्द्रविपुलाः शिलाः ।
चिक्षेप बहुधा भूमौ दुन्दुभिर्विननाद च ॥ १५
ततः श्वेताम्बुदाकारः सौम्यः प्रीतिकराकृतिः ।
हिमवानब्रवीद्वाक्यं स्व एव शिखरे स्थितः ॥ १६
क्लेष्टुमर्हसि मां न त्वं दुन्दुभे धर्मवत्सल ।
रणकर्मस्वकुशलस्तपस्विशरणं ह्यहम् ॥ १७
तस्य तद्वचनं श्रुत्वा गिरिराजस्य धीमतः ।
उवाच दुन्दुभिर्वाक्यं क्रोधात्संरक्तलोचनः ॥ १८
यदि युद्धेऽसमर्थस्त्वं मद्भयाद्वा निरुद्यमः ।
तमाचक्ष्व प्रदद्यान्मे योऽद्य युद्धं युयुत्सतः ॥ १९

G 4 9 49
B 4 11 19
L 4 8 14

---

different size containing st 103[a]– 218[c] (vulg) of Sundara Kanda Sarga 1 is misplaced
—[c]) D3 गाम (for गाढ़) V1 3 शकरस्य गुर्हे नाशि(V1 °ह सोऽपि)

13 V1 missing D11 om 13[a] (for both cf v l 12) —[a]) D5 8–10 T1 महा (for गुहा) D1 3 6 प्रश्रवणोपेतो —[b]) K(ed) Cg निर्दर (for निर्झर) D3 10 बहु(D1 °ह)निर्झरकंदर —[c]) G1 समर्थं स (by transp) D6 समर्थस्तव तु प्रीतिम् —[d]) B1 M3 अतुल D3 11 M1 दातुम् (for कर्तुम्) D5 8–10 मर्हसि(D9 °सि) (for माहवे)

14 V1 missing (cf v l 12) D1 reads 14[ab] in marg —[a]) D4 11 स (for तं) D3 भीतिमप (sic) T G M3 3 भीत इति (for भीतमिति) N V1 2 B D7 गमनावन(N1 स त भीत)मिति ज्ञात्वा —D1 reads 14[cd] after 15 —[c]) D4 8 10 आगम्य (for आगच्छत्) Ś1 D4 12 हिमवन्तमथागच्छत् D3 11 हिमवन्त दुराधर्ष —After 14[c] D3 11 ins

211* युद्धायाभिजगाम स ।
दुन्दुभि स महाकायश्च

—[d]) B1 3 श्र(B1 घ)र चापाद्, D3 11 चापाच्छर (by transp) D13 शरश्च° (for शरश्चापाद्) B4 नानापादप शोभित

15 V1 missing (cf v l 12) —[a]) Ś1 D1 3 8 12 G1 मत D3 11 श्रृगाद्, D13 श्वेत, L(ed) तत्र (for श्वेता) —[b]) D4 राजेंद्र, G3 नरेंद्र, Ch t as in text (for गजेन्द्र) Ñ1 V1 2 B D4 7–10 प्रतिमा D3 11 -सदृशा (for विपुला) —[c]) Ś1 N1 D1–4 13 11 बहुला (for बहुधा) —After 15 Ñ1 V1 3 B1–4 D7 ins

212* युद्धं प्रयच्छ मे शीघ्रं पर्वतेन्द्र महाबल ।
सद्युद्धेन समाख्यातस्त्वं वै युद्धविशारद ॥

whereas D1 reads 14[cd]

16 V1 missing (cf v l 12) —[ab]) D2 सौम्यो प्रतिमयाकृति (for [b]) Ś1 N1 D1 4 8 12 11 तम सोमस्य सदृश सोमस्येव प्रभा(V1 स सोमसदृशा)कृति —For 16[ab] N1 V1 3 B D7 subst

213* ततो हिमवताकार सौम्य प्रतिमयाकृति ।
Ñ1 हिमधराकार V1 3 B4 हिमधरा वीर (L(ed) धीर) B1 3 हमधरा° (for हिमवता°) N2 V3 B4 D7 श्री(B4 D7 प्र)तिमयाकृति (B4 °ति) V2 प्रीतिकराकृति]
—[d]) Ś1 D13 स्थित (for °त) V3 V1 1 B D7 दुंदुभिं दानवर्षभ(V1 1 B4 °वधर) D3 11 स्वकीयशिखरस्थित

17 V1 missing (cf v l 12) —[ab]) Ś1 D1 2 8 12 13 हतुम् Ñ1 द्रहुम् (for क्लेष्टुम्) D2 मा सा, D4 न मां (by transp) D13 मा श (for मा न) Ś1 N1 D3 12 11 धर्मवत्सल, D1 भक्ति°, D11 वत° (for धर्मवत्सल) N1 V1 3 B D7 अधन्यायितुं वीर न त्वमर्हसि मामिह(B4 °ति) —D1 reads 17[c] in marg —[c]) D11 युद्ध (for रण) Ś1 D12 दुराधर्षो रण च त्व Ñ1 दुराद्धर्षो रणोदर्य (sic) Ñ1 V1 3 B D7 अश(Ñ1 °स)क्तोस्मि रणोदर्ये (N1 D7 °णे योद्धु, V3 °ण दातु B4 °णोत्कर्षे) D2 8 10 दुराद्धर्षे(D13 °दर्षो) रणोदर्ये (D11 °प) D7 युद्धकर्मण्य कुशल —[d]) Ś1 Ñ V1 3 B1–4 D M1 शरणो (for °णं) M1 [स]स्म्यह (for ह्यहम्)

18 V1 missing (cf v l 12) —[a]) D3 11 (त)तद् (for तद्) B1 reads श्रुत्वा sup lin —[b]) N1 V1 2 B D7 दानव (for धीमत) —[d]) Ñ1 V1 3 B D7 3 11 M1 क्रोध, D6 M3 रोषात्, G2 3 कोपात् (for क्रोधात्) —For 18[cd] Ś1 N1 D1–4 12 13 subst

214* प्रगर्जमप्रशान्तात्मा वाक्य चोवाच दुन्दुभि ।
[V1 प्रलमस्य (sic) D1 प्रगम्भ- D2 प्रशान्त, D4 प्रहास (for प्रगर्ज) D1 वाच (for वाक्य) Ś1 D4 12 प्रोवाच (for चो°)]

19 V1 missing (cf v l 12) —[a]) D4 6 T1 युद्ध (for युद्धे) Ñ1 V1 3 B D7 transp यदि and युद्ध —[b]) Ñ1 भयाद्वासि, V1 सभयाद्वा B1–3 यदि वासि, D7 मया वासि (for मद्भयाद्वा) D3 11 भीतिरस्ती(D13 °म) (sic) (for वा निरुद्यम) —[c]) V1 D3 11 13 तद् (for तम्) —D6 reads from मान्मे up to यो in [c] in marg —[d]) N1 D7 वै D13 10 हि (for ऽद्य) V1 युद्धे D4 illeg D12 marg (for युद्धं) Ś1 B1(after corr sup lin as in text) D1–4 11–13 युयुत्सवे V1 D10 यु(V1 प्र [sic])युत्सव V3 D7 ययुत्सत (for युयुत्सत) —After

G 4 9 0
B 4 21 20
L 4 8 15

हिमवानब्रवीद्वाक्यं श्रुत्वा वाक्यविशारदः ।
अनुक्तपूर्वं धर्मात्मा क्रोधात्तमसुरोत्तमम् ॥ २०
वाली नाम महाप्राज्ञः शक्रतुल्यपराक्रमः ।
अध्यास्ते वानरः श्रीमान्किष्किन्धामतुलप्रभाम् ॥ २१
स समर्थो महाप्राज्ञस्तव युद्धविशारदः ।
द्वंद्वयुद्धं महद्दातुं नमुचेरिव वासवः ॥ २२
तं शीघ्रमभिगच्छ त्वं यदि युद्धमिहेच्छसि ।
स हि दुर्धर्षणो नित्यं शूरः समरकर्मणि ॥ २३
श्रुत्वा हिमवतो वाक्यं क्रोधाविष्टः स दुन्दुभिः ।
जगाम तां पुरीं तस्य किष्किन्धां वालिनस्तदा ॥ २४
धारयन्माहिषं रूपं तीक्ष्णशृङ्गो भयावहः ।
प्रावृषीव महामेघस्तोयपूर्णो नभस्तले ॥ २५
ततस्तु द्वारमागम्य किष्किन्धाया महाबलः ।
ननर्द कम्पयन्भूमिं दुन्दुभिर्दुन्दुभिर्यथा ॥ २६

19 Ñ2 V3 B D7 read second time l 3-6 of App I (No 7)

20 V1 missing (cf v l 12) G(ed) om 20 —^ab) G1 M3 त्वब्रवीद् (for ब्र°) D8 वाक्यविशारद Ñ2 V3 B D7 हिमवांस्तु सुसंरब्ध इदं वचनमब्रवीत् —^c) D13 अनुक्त्वा पूर्वं, T2 °पूर्वो M3 आनुपूर्व्येण, G2 k t as in text (for अनुक्तपूर्वं) —D8 reads from धर्मात्मा up to 20^d in marg —^d) Ś1 दुर्मतिम् (unmetrical) D4 दुरात्मम्, D13 दुन्दुभिम् (unmetrical) (for क्रोधात्तम्) V3 मसुरेश्वर —After 20 Ñ2 V3 B D7 read second time while D13 reads l 7-8 of App I (No 7)

21 V1 missing (cf v l 12) D8,12 transp ^ab and ^cd —^a) Ś1 Ñ1 D8 11 12 महाप्राज्ञ, V3 D8 11 M3 °वीर्यं G(ed) °बाहु (for °प्राज्ञ) —^b) Ś1 D2 4 8 12 T2 G M1 3 शक्रपुत्र प्रतापवान् —B1 reads 21^c-22 in marg —^cd) D4 अध्यास्ते (sic) (for अध्यास्ते) D8 G1 3 M वानर (for °र) D1 7 किष्किन्ध्याम् D8 अतुलां D13 मनल (for अतुल°) Ś1 Ñ V2 3 B D1 2 4 7 12 13 G1 M3 प्रभ (B3 °भ) D9 शुभा (for प्रभाम्) D7 11 किष्किन्धाम (D11 °मा) अमन्दघो (D3 °हो) हरीणामीश्वर प्रभु

22 V1 missing (cf v l 12) B1 reads 22 in marg (cf v l 21) —^a) D3 12 महाबाहुर् (for °प्राज्ञस्) Ś1 D2 4 8 12 13 स दास्यति महावीर्यस्, Ñ1 महासमर्थो (sic) महाप्राज्ञ —^b) D8,13 सर्व, D4 यत्र (for तव) Ś1 D2 4 8 12 युद्धे, B4 युद्धे (for युद्ध) —D8 om (hapl) from विशारद up to युद्ध in 23^d Ś1 B1 D13 विशारद (for °रद) —^c) B1 स तु D8 तत्र (for द्वंद्व) Ś1 D2 4 8 12 13 महाघोरं Ñ1 महाप्राज्ञ (also °घोर) B3 बली दातुं D8 10 स दातुं ते, G(ed) महान्दातुं (for महद्दातुं) —^d) M3 वानर (for वासव) B Cl एक स शक्र प्रतिद्वन्द्वपराक्रमावक Ak

23 V1 missing (cf v l 12) D8 om up to युद्ध in^d (cf v l 22) —^a) M3 [अ]य (for त्वं) Ś1 Ñ1 D1-4 11-13 तं शीघ्रमभि (Ś1 D13 °मि)गच्छन्त्य —^b) Ś1 D12 युद्धं मनसश्च Ñ1 D8,13 योद्धुं (D9 युद्धे) यदि त्वद्य Ñ2 V3 3 B D7 11 युद्ध (V2 B4 3 मद्यु D13 योद्धुं) त्वयाद्य D1 योद्धुं हि योत्स्यसि G1 M3 योद्धु° (for युद्धमि°) हेच्छसि) M1 तेन योद्धुं कृतत्वर —^c) Ñ V2 B1 D1-4 11 12 T G1 3 M1 2 दुर्धर्षणो (for दुर्ध°) Ś1 Ñ V3 3 B (B1 marg) D1 3 4 7 12 13 वाली (for नित्यं) —^d) Ś1 Ñ1 V2 3 B D1 2 4 7 12 13 नित्य (for शूर) Ñ2 V2 3 B4 D7 11 G1 -कर्मसु —After 23 Ñ2 V3 3 B D7 read second time l 12-16 of Appendix I (No 7) and then cont

215* जितमेव सदा मेने वालिन परदर्पितं ।

24 V1 missing (cf v l 12) —^a) D3 8 10 T1 कोपाविष्ट स G1 M2 पर्वतेंद्रस्य (for क्रोधा°) —For 24^ab Ś1 Ñ V2 3 B D1-4 7 11-13 subst

216* तत श्रुत्वा हिमवत पर्वतेन्द्रस्य दुन्दुभि ।

[Ś1 Ñ1 D1 2 4 12 13 स तत् (for तत) D3 11 स तु श्रुत्वा (for the prior half) Ś1 Ñ1 D1 2 4 12 13 मति x (दुन्दुभि°)]

—^c) D2 11 नगरीं (for तां पुरीं) Ñ V2 3 B D2 4 7 11 रम्यां D3 11 घोरां, G1 हृष्ट, M3 हृष्टो (for तस्य) Ś1 D12 आजगाम पुरीं एकां (sic) —^d) Ś1 Ñ V2 3 B D1-4 7 11 12 M3 वालिपालितां

25 V1 missing (cf v l 12) V2 illeg up to शृङ्गो in^b —^a) D4 8-10 G1 M3 वेषं (for रूपं) —^b) V1 रूपं (for शृङ्गो) Ñ1 D2 भयावहं D3 11 महाबल (D11 °बल) G1 भयानक (for भयावह) D4 12 तीक्ष्णशृङ्गो दुरासदः M3 °वेगो महाबल —^c) Ś1 D12 प्रावृषेण्यो V2 D3 13 यथा (for महा) —^d) T G M1 2 नभस्थले

26 V1 missing (cf v l 12) —^a) G1 illeg for स्तु G2 C_b तद् (for तु) M1 प्राप्य Ś1 Ñ V2 3 B D1 2 4 7 11-13 स निर्दी(V2 V3 B1 3 D4 13 °र्दी)र्य महाद्वारं —^b) B2 3 D1 4 7 11 12 किष्किन्धा (D1 °न्धा)यां (for °या) —^c) Ś1 D12 ननाद —Ś1 om 26^cd-29^b —^d) D3 13 °नदो D8 om (hapl) D12 स्वयं (for मृदं) दुन्दुभिर् Ś1 D1 2 4 12 13 दुन्दुभिस्तत्र V2 V3 B D7 विनिर्दिग्धाय (for दुन्दुभिर्यथा)

समीपजान्द्रुमान्भञ्जन्वसुधां दारयन्खुरैः ।
विषाणेनोल्लिखन्दर्पात्तद्द्वारं द्विरदो यथा ॥ २७
अन्तःपुरगतो वाली श्रुत्वा शब्दममर्षणः ।
निष्पपात सह स्त्रीभिस्ताराभिरिव चन्द्रमाः ॥ २८
मितं व्यक्ताक्षरपदं तमुवाच स दुन्दुभिम् ।
हरीणामीश्वरो वाली सर्वेषां वनचारिणाम् ॥ २९
किमर्थं नगरद्वारमिदं रुद्ध्वा विनर्दसि ।
दुन्दुभे विदितो मेऽसि रक्ष प्राणान्महाबल ॥ ३०
तस्य तद्वचनं श्रुत्वा वानरेन्द्रस्य धीमतः ।
उवाच दुन्दुभिर्वाक्यं क्रोधात्संरक्तलोचनः ॥ ३१
न त्वं स्त्रीसंनिधौ वीर वचनं वक्तुमर्हसि ।
मम युद्धं प्रयच्छ त्वं ततो ज्ञास्यामि ते बलम् ॥ ३२
अथवा धारयिष्यामि क्रोधमद्य निशामिमाम् ।
गृह्यतामुदयः स्वैरं कामभोगेषु वानर ॥ ३३
यो हि मत्तं प्रमत्तं वा सुप्तं वा रहितं भृशम् ।
हन्यात्स भ्रूणहा लोके त्वद्विधं मदमोहितम् ॥ ३४

G. 4. 9. 70
B. 4. 11. 35
L. 4. 8. 70

---

27 V1 missing (cf v. l. 12). Ñ1 om. 27 (cf v. l. 26). — a) Ś1 D[illegible] T1 M1 समीपगान् ; Ñ2 B1 D2 M2 °गान् (for समीपजान्). Ś1 D[illegible] भञ्ज्या ; D3 lacuna (for भञ्जन्). — b) D[illegible] दारयन्नेदिनीं खुरैः. — c) Ś1 D[illegible] विषाणैः ; D[illegible] शृङ्गाभ्याम् (for विषाणेन) ; Ñ2 V[illegible] B D[illegible] शृङ्गाभ्यां (Ñ2 V2 B4 °भ्यां) लिखन् ; G1 (orig.) विषाणेनोल्लिखन् (as in text). D[illegible] दैत्य (for दर्पात्). — d) Ś1 D[illegible] वज्री (for द्विरदो). — After 27, Ñ2 V[illegible] (mostly illeg.) B D[illegible] ins.:

217* स तु मेघप्रतीकाश नर्दंश्च भयावहम् ।
दुन्दुभिं ह्यन्यथेहैं न कश्चित्प्रत्यवेक्षयत् ।

28 V1 missing (cf v. l. 12). Ñ1 om. 28 (cf v. l. 26). — a) Ś1 D[illegible] श्रुत्वा चैवमतो ; Ñ2 V[illegible] B D[illegible] तस्य (D1 तत, D[illegible] तं तु) शब्दं (V[illegible] °ब्दि)°, D[illegible] तत्र शक्रपुरे, G (ed.) तस्य वै दशतो (for अन्तःपुरगतो). — b) D[illegible] समर्षणः. — c) D[illegible] निष्पात. Ñ2 D[illegible] कृत (for सह).

29 V1 missing, (ab) (cf v. l. 12). Ñ1 om. 29ab (cf v. l. 26). — ab) V1 illeg. up to दुन्दु. D[illegible] स्पष्ट (D[illegible] °ष्ट) ; D[illegible] मितं ; D[illegible] महान् ; M1 वाक्यं (for मितं). D[illegible] (स) स्पष्टेन (for व्यक्त). Ś1 D[illegible] स्पष्टं स्पष्टम् (D[illegible] °स्पष्ट) ; Ñ2 V1 B D[illegible] अक्षय्य (D[illegible] व्यक्तार्थ) वाक्यपदं (for °). Ñ2 T[illegible] M[illegible] [illegible] D[illegible] [illegible] दुन्दुभि (for °भिम्). D[illegible] व्यक्ताक्षरपदं तमुवाच महादुन्दुभिं (sic). — c) D[illegible] सर्वेषां (D[illegible] हरीणां) मुनिपुङ्गवः.

30 a) D[illegible] कमद्द्वारम् ; D[illegible] (illeg.) ; [illegible] नगरद्वारम्). — b) Ñ2 D[illegible] D[illegible] रुद्ध्वा (for रुद्ध्वा). D[illegible] रुध्य (for [illegible]) Ś D[illegible] विनदसि. Ñ2 V[illegible] [illegible] (for विनर्दसि). — c) D[illegible] दुन्दुभिं (for °भे). — d) Ñ2 V1 B D[illegible] महाबाहो (by transp.). Ñ2 V1 B D[illegible] [illegible] [illegible] (for महाबल). D[illegible] [illegible] प्राणान्महाबल.

31 a) Ñ2 V1 D[illegible] D[illegible] सदैव तद् ; B4 तदा तद् (for तस्य तद्). — b) Ñ2 V1 B D[illegible] वालिन् (for धीमतः). — B[illegible] om. 31cd. — c) Ñ2 V1 B[illegible] D[illegible] M1 क्रोध ; G क्रोधात् ; M1 रोषात् (for क्रोधात्). — D[illegible] reads from उवाच up to क्रोध in 31c in marg.

32 D[illegible] reads 32 in marg. (cf v. l. 31). — a) Ñ2 V B D[illegible] T1 G[illegible] M1 [illegible] ; G1 कथं ; M1 तत् (for न). D[illegible] धर्म (for वीर). — b) G M[illegible] इच्छसि (for अर्हसि). Ś1 Ñ1 D[illegible] परिवेष्टुं वानराधिप. Ñ2 V B D[illegible] युद्धं (B °दायाम्) युद्ध्यसि (B1 °सि). — c) D[illegible] मया. D[illegible] प्रयच्छाद्य. D[illegible] T[illegible] G[illegible] M[illegible] C[illegible] °च्छाम (for प्रयच्छ त्वं). — d) Ñ2 V B D[illegible] M1 ज्ञास्यसि मे (for ज्ञास्यामि ते).

33 D[illegible] reads up to क्रोध in a in marg. (cf v. l. 31). — a) Ñ1 V B D[illegible] मर्षयिष्यामि. C[illegible] as in text (for धार°). — b) D[illegible] (marg. also) क्रोधं मुक्त्वा (for °मद्य). T[illegible] इमां (for इमाम्). — c) Ñ1 [illegible] V1 [illegible] D[illegible] [illegible] D[illegible] [illegible] D[illegible] T1 C M[illegible] [illegible] D[illegible] T[illegible] G[illegible] M[illegible] °थ ; G1 °थे) [illegible] D[illegible] [illegible] C[illegible] as in text ([illegible]). — After 33, D[illegible] (marg.) [illegible] ins.:

218* [illegible]
[illegible]
[illegible]
[illegible]

(l. 1) [illegible]

34 a) Ñ1 V B [illegible]

G. 4 9 71
B 4 11 37
L. 4 8 30

स प्रहस्याब्रवीन्मन्दं क्रोधात्तमसुरोत्तमम् ।
विसृज्य ताः स्त्रियः सर्वास्ताराप्रभृतिकास्तदा ॥ ३५
मत्तोऽयमिति मा मंस्था यद्यभीतोऽसि संयुगे ।
मदोऽयं संप्रहारेऽस्मिन्वीरपानं समर्थ्यताम् ॥ ३६

तमेवमुक्त्वा संक्रुद्धो मालामुत्क्षिप्य काञ्चनीम् ।
पित्रा दत्तां महेन्द्रेण युद्धाय व्यवतिष्ठत ॥ ३७
विषाणयोर्गृहीत्वा तं दुन्दुभिं गिरिसंनिभम् ।
वाली व्यापातयांचक्रे ननर्द च महास्वनम् ॥ ३८

प्रमत्त) —^{b}) V1 D5 8-10 भग्न वा, G3 प्रमत्त (for सुप्त वा) Ñ2 B D1 3 4 रहिते, V3 रहितो, D2 पतित D12 रोहित, M1 [अ]रिं हत (for रहित) Ś1 Ñ V D4 7 12 नर, B1 3 4 रत, B2 पर, D1 3 11 रिपु, D2 18 चरै, D8-10 G2 कृत्वा (for भृशम्) —^{cd}) Ś1 V3 D12 निरय गच्छेत्, Ñ1 D1(cross ed marg as in text) 4 प्रसभ हन्यात्, N1 V1 3 B1-3 D7 खलु हन्याद्धि (B1-3 °पु) D3 om D11 व्यसन मोहात् (for भूणघ्न लोक) B4 अन्यायमत्त निहन्याद्धि (for °) B1-3 (ए)तद्द्विध. D1 तद्विधं (for स्य°) Ś1 Ñ V1 3 B1 4 D1 3 12 M1 म(Ñ1 स)दविक्लव. V2 B2 3 °विह्वल, D4 °विक्रम, D5 काम° (for मदमोहितम्) D3 11 स(D3 s) मयेत्पुरुषाधम (for ^{d}) D2 13 अभ्यासन्न परायत्त(D13 °पर्ये) स भयेनैव धर्मवित् ∥ Cv यो हि मत्तमित्यादेरनितम पदं सबोधनान्त वाक्यम् । अन्यथा मत्तमित्यनेन पुनरुक्त स्यात् ∥ —After 34 Ś1 D1 3 4 12 ins

219* तस्य तद्वचनं श्रुत्वा वानरेन्द्र प्रतापवान् ।

35 ^{a}) Ś1 N1 D1-4 12 13 स, Ñ2 V B D5 त G1 lacuna (for स) D11 विहस्य M1 प्रसह्य (for प्रहस्य) Ś1 Ñ1 D1-4 12 13 G1 M1 3 वाक्यम्, Ñ1 V B D7 11 वाली, Cg as in text (for मन्द) —^{b}) D3 11 बलवान्, G1 M1 2 इद तम्, G2 कोपात्तम् (for क्रोधात्तम्) D5 10 असुरेश्वर (for °रोत्तमम्) Ś1 N1 D1 3 4 12 13 इद(Ś1 °ति, D13 °व) मद महासुरं, V1 V B D7 वाक्य वानर(D7 दान *)पुगव, G(ed) वाक्य वाक्यविशारद —^{c}) B विसर्ज्य (sic) D4 तत (for स्त्रिय) —^{d}) Ś1 Ñ1 D1 3 4 11-13 प्रभृतयस्, D4 प्रकृतिकास् (for प्रभृति°) Ñ2 V B D7 ताराद्या वानरेश्वर (B1-3 °र्षभ) D3 ताराप्रभृतयोमय

36 Ñ1 om 36^{ab} —^{a}) Ś1 D3 4 11 13 विज्ञाय, Ñ2 V B4 D7 दुर्वृत्ते(V3 D7 °त्त) B1-3 दुर्बुद्ध, D3 11 मां ज्ञात्वा G1 M3 मां मत्वा (for मा मंस्था) D1 मत्तस्त्वमसि सप्रासौ —^{b}) Ś1 D2 4,11-13 यदि(D12 °द्य) भीतोऽसि, D1 यद्भीतोऽसि च (for यद्यभीतोऽसि) Ñ1 V B D7 मोहान्मामवमन्यस —After 36^{ab}, Ś1 D4 12 ins

220* दैत्यापसद याहि त्वं यदि जीवितुमिच्छसि ।

—^{c}) D1 मदो य । D4 मदायं D13 मदोय G(ed) मदीये (for मदोऽयं) D2 4 13 संप्रहारोय(D4 °रो से) (for °हारे ऽस्मिन्) Ś1 D12 मदोऽयं प्रहारेऽस्मिन् —^{d}) N1 V3 Ck -पानं Cv r m g t as in text (for -पानं) D1 म गृह्यतां (for समर्थ्यताम्) Ś1 Ñ1 V2 D1 3,4 11-13 दैत्य(Ñ1 V3 D1 वीरा D11 तव)प्राणा हरिष्यन्ति D7 वीरप्राणं हरिष्यन्ति ∥ Ck वीर पाणमिति "वा भावकरणयोरिति" ल्युट्वम् ∥ —After 36 N1 V B D7 ins while D3 ins after 36^{ab}

221* यदि युद्धे स्पृहा तेऽस्ति यदि भीतो न संयुगे ।
तिष्ठ त्वं समरे मेऽद्य दर्शयस्व स्वपौरुषम् ।

[(l 1) D7 युद्धस्पृहा Ñ2 D7 [ऽ]स्ति (for ऽस्य) D1 [ऽ]सि (for न) —(l 2) Ñ2 D7 तु B4 ते (for मे)]

37 ^{a}) D3 11 सरब्धो —^{b}) Ś1 Ñ1 D1-4 11-13 कामु (D4 12 दत्तु)य्य (for उत्क्षिप्य) —After काच, D4 ins (marg) मदसे लोहकटके —V1 damaged for महेन्द्रेण युद्धा in ^{cd} —^{d}) V1 D13 व्यवतिष्ठत (for °ष्ठत) G2 युद्धयैव व्यतिष्ठत —After 37, Ñ2 V B D2 7 11 ins

222* ततो युद्धं प्रवृत्तं तयो सुतुमुलं तदा ।
वालिनश्च महाबाहो बलिनो दानवस्य च ।
ततो वाली विषाणाभ्यामुल्लिखितो दनुसूनुना ।
प्रचकाशे महाबाहुरशोक इव पुष्पित ।
स तेन सह विक्रीड्य मुहूर्तं वानरर्षभ । [5]
महसन्दानवश्रेष्ठ वीरो वचनमब्रवीत् ।
असुराधम दुर्बुद्धे मदाय्दानेन दर्पित ।
अद्य त बलमुद्वृत्तं शमयेऽस्मि मिषात्मभासा ।

[(l 1) D1 प्रवर्तत (for °वृत्ते) —(l 2) B1-3 महाबाहो(for °बाहो) —(l 3) D3 11 विषाणाभ्यां सङ्गुतो(D11 °श्याग् ल्लुतो) (for °णाभ्यामुल्लिखितो) —(l 4) D11 स चकाशे —(l 5) D3 11 सहसा क्रीडन् (for सह विक्रीड्य) G(ed) वानरेश्वर —(l 6) D3 11 प्रहस्य दानव त तु (for the prior half) N2 वीरो D11 पुनः (for वीरो) —(l 7) V1 बलमानेन V2 3 बलेना°, D4 बल्यानेव (for बलमानेन) B1-3 मोहित —(l 8) D3 11 वपुर् (for बलम्) B1 उद्धृतं D2 उद्धृत (for उद्धृत)]

—After 37, G1 ins 224*

